# Girvana Vani

# गीर्वाणवाणी

## Document Information

Text title : Girvana Vani

File name : gIrvANavANI.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : August 22, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 22, 2020

*sanskritdocuments.org*

# गीर्वाणवाणी

(गीतिका) (भुजङ्गप्रयात वृत्तम्)
इयं देववाणी सदा सेवनीया
सदा पोषणीया सदा रक्षणीया ।
इयं भारतश्रीरियं देशकीर्तिः
इयं देशवनद्यैर्वृता वन्दनीया ॥ इयं० ॥

यदीष्टं भवे भारतस्याभिवृद्धिः
स्वदेशस्य कीर्तिं स्वदेशस्य मानम् ।
सदाऽध्यात्म-ज्योतिः प्रसारेण शान्तिं
तदा देववाणीं वुधैः सेवनीया ॥ इयम् ॥

कथं शोभते देववाणी प्रकृष्टा
कथं राजते देववर्यैः स्तुतेयम् ।
गुणानां निधाना बुधानां प्रधाना
सुधीनां सदा ज्ञान-विज्ञान-दात्री ॥ इयं० ॥

सदा संस्कृता सस्कृतेर्मूलमन्त्रः
जनैः संस्तुता प्रेम-सद्भाव-दात्री ।
अधानां निहन्त्री सुधा-धाम-धर्त्री
जनानां समस्तं मलं नाशयिनी ॥ इयं० ॥

इयं भारते बद्धमूला प्रशस्ता
स्वदेशे विदेशे स्तुता विज्ञवर्यैः ।
चरित्रोन्नतेर्भाव-सद्भावनीया
सदा शिक्षणे दत्तचित्ता वरेण्या ॥ इयं० ॥

पराधीनता-पाश-नष्टाऽप्यनष्टा,
सदा दानवैः पीडिताऽप्यक्षतेयम् ।
सुधाऽऽगार रूपा बुधाऽऽधार-रूपा,

गुणाऽऽकार-रूपा जनाऽऽह्लाद-रूपा ॥ इयं० ॥

अजस्त्रं गुणाऽधायिनी ज्ञान-मूला,
श्रुतेर्नाद-जुष्टा, प्रपुष्टाऽगमैश्च ।
सदाऽध्यात्म-पुष्टा, श्रिता दर्शनैश्च
वृता ज्ञान-दीप्त्या, धृता धर्मधुर्यैः ॥ इयं० ॥

श्रिता ज्ञानिभिर्वेद विद्योपलब्ध्यैः
वृता योगिभिर्योग-ज्ञानाऽऽगमाय ।
श्रिता काव्यकारैर्रसाऽऽस्वाद-हेतोः,
धृता नाटयकारैर्जनाऽऽह्लाद-हेतोः ॥ इयं० ॥

इयं शान्ति-दात्री, इयं ज्ञानदात्री,
इयं भारतोत्थान-तन्त्रं प्रकृष्टम् ।
इयं गौरवाऽधानहेतुः प्रकृष्टः
इयं ज्ञान-ज्योतिः, सुविद्या प्ररोचि ॥ इयं० ॥

इदं सस्कृतं देशबन्धस्य मूलम्, ।
इदं देश-प्रान्तादि भेदस्य हर्तृः ।
इदं भारतस्याक्षयं कोषजातम्,
इदं शान्ति मूलं सदा पोषणीयम् ॥ इयं० ॥

Proofread by Mandar Mali

*Girvana Vani*

pdf was typeset on August 22, 2020

Please send corrections to *sanskrit@cheerful.com*